# શ્રીરાઘવેન્દ્રસ્તોત્રમ્

શ્રીપૂર્ણબોધગુરુતીર્થપયોબ્ધિપારા કામારિમાક્ષવિષમાક્ષશિરઃ સ્પૃશન્તી ।
પૂર્વોત્તરામિતતરઙ્ગચરત્સુહંસા દેવાલિસેવિતપરાઙ્ઘ્રિપયોજલગ્ના ॥ ૧ ॥

શ્રીપૂર્ણબોધગુરુતીર્થપયોબ્ધિપારા કામારિમાક્ષવિષમાક્ષશિરઃ સ્પૃશન્તી ।
પૂર્વોત્તરામિતતરઙ્ગચરત્સુહંસા દેવાળિસેવિતપરાઙ્ઘ્રિપયોજલગ્ના ॥ ૧ ॥

જીવેશભેદગુણપૂર્તિજગત્સુસત્ત્વ નીચોચ્ચભાવમુખનક્રગણૈઃ સમેતા ।
દુર્વાદ્યજાપતિગિળૈર્ગુરુરાઘવેન્દ્રવાગ્દેવતાસરિદમું વિમલીકરોતુ ॥ ૨ ॥

શ્રીરાઘવેન્દ્રઃ સકલપ્રદાતા સ્વપાદકઞ્જદ્વયભક્તિમદ્ભ્યઃ ।
અઘાદ્રિસમ્ભેદનદૃષ્ટિવજ્રઃ ક્ષમાસુરેન્દ્રોઽવતુ માં સદાઽયમ્ ॥ ૩ ॥

શ્રીરાઘવેન્દ્રોહરિપાદકઞ્જનિષેવણાલ્લબ્ધસમસ્તસમ્પત્ ।
દેવસ્વભાવો દિવિજદ્રુમોઽયમિષ્ટપ્રદો મે સતતં સ ભૂયાત્ ॥ ૪ ॥

ભવ્યસ્વરૂપો ભવદુઃખતૂલસઙ્ઘાગ્નિચર્યઃ સુખધૈર્યશાલી ।
સમસ્તદુષ્ટગ્રહનિગ્રહેશો દુરત્યયોપપ્લવસિન્ધુસેતુઃ ॥ ૫ ॥

નિરસ્તદોષો નિરવદ્યવેષઃ પ્રત્યર્થિમૂકત્ત્વનિદાનભાષઃ ।
વિદ્વત્પરિજ્ઞેયમહાવિશેષો વાગ્વૈખરીનિર્જિતભવ્યશેષઃ ॥ ૬ ॥

સન્તાનસમ્પત્પરિશુદ્ધભક્તિવિજ્ઞાનવાગ્દેહસુપાટવાદીન્ ।
દત્ત્વા શરીરોત્થસમસ્તદોષાન્ હત્ત્વા સ નોઽવ્યાદ્ગુરુરાઘવેન્દ્રઃ ॥ ૭ ॥

યત્પાદોદકસઞ્ચયઃ સુરનદીમુખ્યાપગાસાદિતા-
સઙ્ખ્યાઽનુત્તમપુણ્યસઙ્ઘવિલસત્પ્રખ્યાતપુણ્યાવહઃ ।
દુસ્તાપત્રયનાશનો ભુવિ મહાવન્ધ્યાસુપુત્રપ્રદો
વ્યઙ્ગસ્વઙ્ગસમૃદ્ધિદો ગ્રહમહાપાપાપહસ્તં શ્રયે ॥ ૮ ॥

યત્પાદકઞ્જરજસા પરિભૂષિતાઙ્ગા યત્પાદપદ્મમધુપાયિતમાનસા યે ।
યત્પાદપદ્મપરિકીર્તનજીર્ણવાચસ્તદ્દર્શનં દુરિતકાનનદાવભૂતમ્ ॥ ૯ ॥

સર્વતન્ત્રસ્વતન્ત્રોઽસૌ શ્રીમધ્વમતવર્ધનઃ ।
વિજયીન્દ્રકરાબ્જોત્થસુધીન્દ્રવરપુત્રકઃ ।
શ્રીરાઘવેન્દ્રો યતિરાટ્ ગુરુર્મે સ્યાદ્ભયાપહઃ ॥ ૧૦ ॥

જ્ઞાનભક્તિસુપુત્રાયુઃ યશઃ શ્રીપુણ્યવર્ધનઃ ।
પ્રતિવાદિજયસ્વાન્તભેદચિહ્નાદરો ગુરુઃ ।
સર્વવિદ્યાપ્રવીણોઽન્યો રાઘવેન્દ્રાન્નવિદ્યતે ॥ ૧૧ ॥

અપરોક્ષીકૃતશ્રીશઃ સમુપેક્ષિતભાવજઃ ।



www.Yousigma.com

અપેક્ષિતપ્રદાતાઽન્યો રાઘવેન્દ્રાન્નવિદ્યતે ॥ ૧૨ ॥

દયાદાક્ષિણ્યવૈરાગ્યવાક્પાટવમુખાઙ્કિતઃ ।
શાપાનુગ્રહશક્તોઽન્યો રાઘવેન્દ્રાન્નવિદ્યતે ॥ ૧૩ ॥

અજ્ઞાનવિસ્મૃતભ્રાન્તિસંશયાપસ્મૃતક્ષયાઃ ।
તન્દ્રાકમ્પવચઃકૌણ્ઠ્યમુખા યે ચેન્દ્રિયોદ્ભવાઃ ।
દોષાસ્તે નાશમાયાન્તિ રાઘવેન્દ્રપ્રસાદતઃ ॥ ૧૪ ॥

ૐ શ્રી રાઘવેન્દ્રાય નમઃ ઇત્યષ્ટાક્ષરમન્ત્રતઃ ।
જપિતાદ્ભાવિતાન્નિત્યં ઇષ્ટાર્થાઃ સ્યુર્નસંશયઃ ॥ ૧૫ ॥

હન્તુ નઃ કાયજાન્દોષાનાત્માત્મીયસમુદ્ભવાન્ ।
સર્વાનપિ પુમર્થાંશ્ચ દદાતુ ગુરુરાત્મવિત્ ॥ ૧૬ ॥

ઇતિ કાલત્રયે નિત્યં પ્રાર્થનાં યઃ કરોતિ સઃ ।
ઇહામુત્રાપ્તસર્વેષ્ટો મોદતે નાત્ર સંશયઃ ॥ ૧૭ ॥

અગમ્યમહિમા લોકે રાઘવેન્દ્રો મહાયશાઃ ।
શ્રીમધ્વમતદુગ્ધાબ્ધિચન્દ્રોઽવતુ સદાઽનઘઃ ॥ ૧૮ ॥

સર્વયાત્રાફલાવાપ્ત્યૈ યથાશક્તિપ્રદક્ષિણમ્ ।
કરોમિ તવ સિદ્ધસ્ય વૃન્દાવનગતં જલમ્ ।
શિરસા ધારયામ્યદ્ય સર્વતીર્થફલાપ્તયે ॥ ૧૯ ॥

સર્વાભીષ્ટાર્થસિદ્ધ્યર્થં નમસ્કારં કરોમ્યહમ્ ।
તવ સઙ્કીર્તનં વેદશાસ્ત્રાર્થજ્ઞાનસિદ્ધયે ॥ ૨૦ ॥

સંસારેઽક્ષયસાગરે પ્રકૃતિતોઽગાધે સદા દુસ્તરે ।
સર્વાવદ્યજલગ્રહૈરનુપમૈઃ કામાદિભઙ્ગાકુલે ।
નાનાવિભ્રમદુર્ભ્રમેઽમિતભયસ્તોમાદિફેનોત્કટે ।
દુઃખોત્કૃષ્ટવિષે સમુદ્ધર ગુરો મા મગ્નરૂપં સદા ॥ ૨૧ ॥

રાઘવેન્દ્રગુરુસ્તોત્રં યઃ પઠેદ્ભક્તિપૂર્વકમ્ ।
તસ્ય કુષ્ઠાદિરોગાણાં નિવૃત્તિસ્ત્વરયા ભવેત્ ॥ ૨૨ ॥

અન્ધોઽપિ દિવ્યદૃષ્ટિઃ સ્યાદેડમૂકોઽપિ વાક્પતિઃ ।
પૂર્ણાયુઃ પૂર્ણસમ્પત્તિઃ સ્તોત્રસ્યાસ્ય જપાદ્ભવેત્ ॥ ૨૩ ॥

યઃ પિબેજ્જલમેતેન સ્તોત્રેણૈવાભિમન્ત્રિતમ્ ।
તસ્ય કુક્ષિગતા દોષાઃ સર્વે નશ્યન્તિ તત્ક્ષણાત્ ॥ ૨૪ ॥

યદ્વૃન્દાવનમાસાદ્ય પઙ્ગુઃ ખઞ્જોઽપિ વા જનઃ ।
સ્તોત્રેણાનેન યઃ કુર્યાત્પ્રદક્ષિણનમસ્કૃત ।

સ જઙ્ઘાલો ભવેદેવ ગુરુરાજપ્રસાદતઃ ॥ ૨૫ ॥

સોમસૂર્યોપરાગે ચ પુષ્યાર્કાદિસમાગમે ।
યોઽનુત્તમમિદં સ્તોત્રમષ્ટોત્તરશતં જપેત્ ।
ભૂતપ્રેતપિશાચાદિપીડા તસ્ય ન જાયતે ॥ ૨૬ ॥

એતત્સ્તોત્રં સમુચ્ચાર્ય ગુરોર્વૃન્દાવનાન્તિકે ।
દીપસંયોજનાજ્ઞાનં પુત્રલાભો ભવેદ્ધ્રુવમ્ ॥ ૨૭ ॥

પરવાદિજયો દિવ્યજ્ઞાનભક્ત્યાદિવર્ધનમ્ ।
સર્વાભીષ્ટપ્રવૃદ્ધિસ્સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૨૮ ॥

રાજચોરમહાવ્યાઘ્રસર્પનક્રાદિપીડનમ્ ।
ન જાયતેઽસ્ય સ્તોત્રસ્ય પ્રભાવાન્નાત્ર સંશયઃ ॥ ૨૯ ॥

યો ભક્ત્યા ગુરુરાઘવેન્દ્રચરણદ્વન્દ્વં સ્મરન્ યઃ પઠેત્ ।
સ્તોત્રં દિવ્યમિદં સદા નહિ ભવેત્તસ્યાસુખં કિઞ્ચન ।
કિં ત્વિષ્ટાર્થસમૃદ્ધિરેવ કમલાનાથપ્રસાદોદયાત્ ।
કીર્તિર્દિગ્વિદિતા વિભૂતિરતુલા સાક્ષી હયાસ્યોઽત્ર હિ ॥ ૩૦ ॥

ઈતિ શ્રી રાઘવેન્દ્રાર્ય ગુરુરાજપ્રસાદતઃ ।
કૃતં સ્તોત્રમિદં પુણ્યં શ્રીમદ્ભિર્હ્યપ્પણાભિદૈઃ ॥ ૩૧ ॥

ઈતિ શ્રી અપ્પણ્ણાચાર્ય વિરચિતમ્

રાઘવેન્દ્રસ્તોત્રં સમ્પૂર્ણમ્

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ